Vol. IX

# BULLETIN OF THE GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY MADRAS

EDITED BY

T. CHANDRASEKHARAN, M.A., L.T.
*Curator, Government Oriental Manuscripts Library, Madras*

PRINTED BY THE SUPERINTENDENT
GOVERNMENT PRESS
MADRAS
1956

# TABLE OF CONTENTS


| | |
|---|---|
| Malhaṇastava with the commentary of Docayāmātya (Sanskrit). Edited by Sri T. Chandrasekharan, M.A., L.T. .. .. .. | 1 |
| Munimoḻi (Tamil). Edited by Vidvān V. S. Krishnan .. .. | 33 |
| Karuṇākarāmālai (Tamil). Edited by Vidvān M. Pasupathi .. | 41 |
| Śrī Prasanna Veṅkaṭeśvara Vilāsamu (Telugu). Edited by Sri V. R. Acārya, B.O.L. .. .. .. .. .. .. .. | 49 |
| Cōḷa Rāja Sāṅgatya (Kannaḍa). Edited by Vidvān C. Madhusudana Bhat .. .. .. .. .. .. .. .. | 81 |
| Ottakkōlpiḍittam (Malayālam). Edited by Sri A. Gopala Menon .. | 91 |
| Poona Pett Kaifiyat (Marāṭhi). Edited by Sri K. Thuljaram Ksheerasagar .. .. .. .. .. .. .. .. | 101 |
| Tadhkirat-al-Ansāb (Persian). Edited by Syed Hamza Hussain, Omari Munshi-E-Fāzil .. .. .. .. .. .. .. | 109 |

# MALHAṆASTAVA

By

## MALHAṆA

(with the commentary of Decayāmātya).

Edited by

SRI T. CHANDRASEKHARAN, M.A., L.T.,

*Curator, Government Oriental Manuscripts Library, Madras.*

Malhaṇastava, which is now printed is in praise of Lord Śiva. This is one of the five Śivastotrās called Śivapañcastavī, This work contains 37 verses in Vasantatilaka metre. It is called Malhaṇastava since it is composed by one Kavi called Malhaṇa.

This work is accompanied by the erudite commentary of Decayāmātya about whom details can be had from Volume VII, No. 2 of this Bulletin. The present edition is based on the undermentioned manuscripts.

1. (क) Paper manuscript $8\frac{1}{2} \times 6\frac{1}{2}$ inches in size. It consists of 3 pages of 33 lines to a page. It is written in Telugu script and complete. It bears D. No. 11085.

2. (ख) Palm leaf manuscript $13\frac{3}{4} \times 1\frac{3}{8}$ inches in size. It consists of 13 pages of 6 lines to a page. It is written in Grantha character and complete. It bears D. No. 11084.

3. (ग) Palm leaf manuscript $16\frac{3}{4} \times 1\frac{3}{4}$ inches in size. It contains 8 pages of 6 lines to a page. It is written in Telugu script and complete. It bears D. No. 11086.

4. (घ) Palm leaf manuscript $8\frac{1}{2} \times 1\frac{1}{2}$ inches in size. It consists of 6 pages of 9 lines to a page. It is complete and written in Telugu script. It is preserved under D. No. 11087.

5. (ङ) Palm leaf manuscript $10\frac{7}{8} \times 1\frac{1}{4}$ inches. It contains 10 pages of 5 lines to a page. It is complete and in Telugu script. It bears D. No. 11088.

6. (च) Palm leaf manuscript $13\frac{1}{4} \times 1\frac{1}{4}$ inches. It contains 6 pages of 8 lines to a page. *It is complete and written in Telugu* script. It is preserved under D. No. 11090.

7. (छ) Palm leaf manuscript 15½ × 1⅜ inches. It consists of 25 pages of 6 lines to a page. It is complete and written in Telugu script. It is under D. No. 11091.

8. (ज) Palm leaf manuscript 9⅛ × 1¼ inches in size. It consists of pages 9 of lines 5 to a page. It is complete and written in Telugu script. It bears D. No. 11092.

9. (झ) Palm leaf manuscript 16½ × 1⅜ inches in size. It contains 7 pages of 8 lines to a page. The text herein is accompanied by Decayāmātya's commentary. It breaks off in the course of 7th stanza. It is written in Telugu script. It bears D. No. 11094.

10. (ञ) Palm leaf manuscript 8½ × 2 inches in size. It contains 52 pages of 8 lines to a page. It contains Kannaḍa meaning also. It is complete and written in Kannaḍa script. It is preserved under D. No. 11095.

11. (ट) Palm leaf manuscript 16⅛ × 1⅜ inches in size. It contains 2 folios of 6 lines to a page. It is incomplete and in Telugu script. It bears R. No. 177 (*f*).

12. (ठ) Palm leaf manuscript 11⅞ × 1⅛ inches in size. It contains 1 page having 5 lines on it. It contains only two stanzas and is in Nandināgari script. It is preserved under D. No. 11089.

13. (ड) Palm leaf manuscript 16½ × 1⅜ inches in size. It contains 31 pages of 8 lines to a page. Both Decayāmātya's commentary and the text are available in this bundle. It is complete and written in Telugu script. It is preserved under D. No. 11093. The press-copy of this edition was prepared from this copy.

14. (मु·पु·) A printed copy of the text only published in Telugu script in the Government Oriental Manuscripts Library with Telugu No. 522.

। श्रीरस्तु ।

# ॥ मल्हणस्तवः ॥

(देचयामात्यकृतटीकासहितः)

कान्ताकचप्रचयपुष्पसुगन्धिगन्ध-
लुब्धभ्रमद्भ्रमरकर्बुरकन्धराय ।
गन्धर्वयक्षसुरसिद्धकिरीटकोटि-
संघट्टघृष्टचरणाय नमः शिवाय ॥ १ ॥

ऊरेदेचमहामन्त्री मल्हणस्तुतिपञ्चिकाम् ।
लक्ष्मीधरकटाक्षेण कुरुते गुरुतेजसा ॥

अथ मल्हणनामा कविः उमाकान्तं प्रस्तौति—कान्ताकचेत्यादिना। कान्तानां मत्तकाशिनीनां कचप्रचयाः केशपाशाः तेषु पुष्पाणि तेषु शोभनो गन्धो यस्य स सुगन्धिः स चासौ गन्धश्च सुगन्धिगन्धः पुष्पेषु सुगन्धिगन्धः पराग इति यावत्। तत्र लुब्धाः स्पृहयालवः ते च ते भ्रमन्तः भ्रमणशीलाः परिलुठन्त इत्यर्थः। भ्रमरा मिलिन्दाः तद्वत्कर्बुरा शबला कन्धरा यस्य स तस्मै यद्वा कन्तायाः पार्वत्याः। शेषं समानम्। गन्धर्वयक्ष-सुरसिद्धकिरीटकोटिसङ्घट्टघृष्टचरणाय। गन्धर्वाश्च यक्षाश्च सुराश्च सिद्धाश्च गन्धर्व-यक्षसुरसिद्धाः तेषां किरीटानि तेषां कोटयः ताभिः सङ्घट्टो घट्टनं तेन घृष्टौ बर्बरावित्यर्थः चरणौ पादौ यस्य सः तस्मै। नमः शिवाय। इत्यन्वयः।

अत्र पूर्वार्धे उपमालङ्कारः। भ्रमरवत् कर्बुरकन्धरायेत्यौपम्यप्रतीतेः। यद्यपि भ्रमराणां कर्बुरत्वं परागलुठनात् कविकल्पितमिव प्रतिभाति वास्तवमेव कन्धरागतनीलिम्नः शरीरगतधवलिम्ना मेलनात् कर्बुरत्वम्। ततश्चोपमालङ्कार एव नोत्प्रेक्षालङ्कारगन्धः उत्तरार्धे अतिशयोक्तिः। सा च घर्षणासम्बन्धेऽपि सम्बन्धोक्तेः असम्बन्धे सम्बन्धनिबन्धना। अनयोस्सं-सृष्टिः।

न ब्रह्मविष्णुवचसामपि गोचरस्त्वं
अस्मद्विधस्य किमहो तदवैमि सर्वम् ।
भक्तिस्तथापि शिव मां मुखरीकरोति
युष्मत्स्तुतौ कथय किं करवाणि देव ॥ २ ॥

**न ब्रह्मविष्णुवचसामपीति** । नेति [1]निषेधः । ब्रह्मा चतुर्मुखः विष्णुः [2]मुरारिः तयोर्वचसामपि वाक्यानामपि । अपिशब्दः किमुतेत्यर्थः । गोचरः विषयः । प्रतिपाद्य इत्यर्थः । त्वं भवान् । अस्मद्विधस्य मादृशस्य । किमहो ! अहो इति सम्बोधने । किमिति तुच्छत्वप्रतिपादनम् । यद्वा किमहो किमाश्चर्यमित्यर्थः । तत्सर्वं अवैमि जानामि । भक्तिः भजनविश्वासः । एवं जानामीत्यर्थः । हे शिव ! मङ्गलात्मक ! मां मुखरीकरोति वाचालयति । युष्मत्स्तुतौ भवतः स्तोत्रे । कथय । किं करवाणि । देव ! जगत्क्रीडनशील ! जलन्धरादिदानवजिगीषो ! स्वाध्यस्ताशेषलोक-व्यवहार ! द्युतिस्वरूप ! स्तुत्य !

अत्रेत्थं पदयोजना—हे शिव ! त्वं ब्रह्मविष्णुवचसामपि न गोचरोऽसि । अस्मद्विधस्य वचसामपि किमहो ! तत्सर्वमवैमि । तथापि हे देव ! युष्मत्स्तुतौ भक्तिर्मां मुखरीकरोति । किं करवाणि । कथय । अत्र वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

ये त्वां मरीचिचयचामरचारुचन्द्र-
चूडामणे ! स्तुतिवचोभिरिहार्चयन्ति ।
मायाप्रपञ्चरचनानिचयं विलङ्घ्य
गच्छन्ति ते शिवपुरं रुचिरैर्विमानैः ॥ ३ ॥

**ये त्वामिति** । ये भक्ताः । त्वां भवन्तम् । मरीचिचयचामर-चारुचन्द्रचूडामणे ! मरीचीनां चयः समूहः स एव चामरः वालव्यजनं तद्वच्चारुः स चासौ चन्द्रः स एव चूडामणिर्यस्य सः तस्य सम्बुद्धिः हे मरीचिचयचामरचारुचन्द्रचूडामणे ! चामराङ्कितजगन्मूलस्तम्भवत् चन्द्रमौलितया प्रतिभासीत्यर्थः । स्तुतिवचोभिः स्तुतिवाक्यैः । इह संसारे । अर्चयन्ति [3]गृह्णन्तीत्यर्थः । मायाप्रपञ्चरचनानिचयं, मायाया अविद्यायाः प्रपञ्चाः विक्षेपाः

[1] झ. निषेधे । [2] झ. हरिः । [3] झ. गृणन्ती ।

तेषां रचनाः कल्पनाः तासां निचयः तम् । विवर्तमानं जगदित्यर्थः । विलङ्घ्य अतिक्रम्य । गच्छन्ति प्राप्नुवन्ति । ते भक्ताः शिवपुरं कैलासम् । रुचिरैः रम्यतरैः । विमानैः देवयानैः ।

अत्रेत्थं पदयोजना—हे मरीचिचयचामरचारुचन्द्रचूडामणे ! इह ये त्वां स्तुतिवचोभिरर्चयन्ति ते मायाप्रपञ्चरचनानिचयं विलङ्घ्य रुचिरैर्विमानैः शिवपुरं गच्छन्ति ।

पूर्वार्धेऽतिशयोक्तिरलङ्कारः शेखरीभूतचन्द्रस्य चामरत्वेनाध्यवसानात् भेदे अभेदनिबन्धनातिशयोक्तिः ॥ ३ ॥

उर्वीसमीरयजमानजलानलार्क-
सोमाम्बरादिभिरहो भवतस्तनूभिः ।
व्याप्तं समस्तभुवनं समवेक्ष्य विद्वान्
कुर्यान्न कोऽत्र भगवंस्त्वयि पक्षपातम् ॥ ४ ॥

**उर्वी**त्यादि । उर्वीसमीरयजमानजलानलार्कसोमाम्बरादिभिः, उर्वी भूमिः, समीरो वायुः, यजमानः सोमयाजी, जलमुदकं, अनलो वह्निः, अर्कः सूर्यः, सोमः चन्द्रः, अम्बरं आकाशं तानि आदिर्यासां ताः ताभिः । आदिशब्देन महत्तत्त्वादयो गृह्यन्ते । अहो इति सम्बुद्धिः । यद्वा अहो ! आश्चर्यम् । भवतः ते । तनूभिः मूर्तिभिः । व्याप्तं परिपूर्णम् । समस्तभुवनं संप्रेक्ष्य सम्यक् पर्यालोच्य । विद्वान् पण्डितः । कुर्यान्न कः ? काकुः । अत्र अस्मिन् सति । हे भगवन् ! षड्गुणैश्वर्यसम्पन्न ! त्वयि विषये । पक्षपातं एकतानत्वम् ।

अत्रेत्थं पदयोजना—अहो भगवन् ! उर्वीसमीरयजमानजलानलार्कसोमाम्बरादिभिः भवतस्तनूभिः समस्तभुवनं व्याप्तं समवेक्ष्य को विद्वान् त्वयि पक्षपातं न कुर्यात् । सर्वोऽपि कुर्यादित्यर्थः ।

अयं भावः—भवन्मूर्तिव्यतिरेकेण प्रपञ्चस्याभावात् भवद्व्यतिरेकेण प्रपञ्चकर्तुरभावात् कर्तृव्यतिरेकेण स्तुत्यस्याभावात् भवन्तं विहाय परिज्ञातृजनः वा स्तौतीति ॥ ४ ॥

ब्रह्मेन्द्रविष्णुसुरदानवलोकपालै-
रन्यैश्च [1] दिव्यमुनिभिः परिपूजितं त्वाम् ।
दृष्ट्वापि यस्तु पुनरिच्छति देवमन्यं
संसारिणो नरकहेतुरयं विमोहः ॥ ५ ॥

ब्रह्मेन्द्रेति । ब्रह्मेन्द्रविष्णुसुरदानवलोकपालैः, ब्रह्मा चतुर्मुखः सृष्टिकर्ता इन्द्रः परमैश्वर्यसम्पन्नः, स्वर्गा [2] धिवसतिरित्यर्थः । विष्णुः वासुदेवः, सुराः शोभनं वाञ्छितार्थं रान्ति ददतीति सुराः त्रयस्त्रिंशत्कोटिसंख्याका देवाः, दानवाः राक्षसाः, लोकपालाः अग्न्यादयः तैः । अन्यैर्दैवैः गणदेवताभिः दिव्यमुनिभिः नारदादिभिः । चकारादन्यैश्च मुनिभिर्वसिष्ठादिभिः । परिपूजितं त्वाम् । अत्र च 'मतिबुद्धिपूजार्थेभ्यश्च' इति क्तप्रत्यये 'क्तस्य च वर्तमाने' इति षष्ठ्या भवितव्यम् । तथापि महाकविप्रयोगात्सिद्धम् । दृष्ट्वापि ज्ञात्वापि । अपिशब्दस्सम्भावनायाम् । यस्तु पुनरिच्छति । पुनःशब्दो वाक्यालङ्कारे । इच्छति वाञ्छति । देवमन्यं भवद्व्यतिरिक्तम् । संसारिणस्सतः नरकहेतुः जन्ममरणादिभ्रमणहेतुः । अयं विमोहः इयमविद्या ।

अत्रेत्थं पदयोजना—हे हर ! ब्रह्मेन्द्रविष्णुसुरदानवलोकपालैः अन्यैश्च मुनिभिः दिव्यमुनिभिश्च परिपूजितं [3] त्वां दृष्ट्वापि यस्तु पुनः अन्यं देवमिच्छति संसारिणो जातस्यायं विमोहो नरकहेतुः ।

अयं भावः—सुरासुरमुनीन्द्रैरपि सर्वैर्नमस्कार्यं नमस्कार्यान्तरशून्यं 'एक एव रुद्रो न द्वितीयाय तस्थे' इति श्रुतिप्रतिपादितं महादेवं विहाय यस्तु मन्दबुद्धिः भेदबुद्ध्या तदन्यं देवान्तरं सेव्यतया स्वीकरोति स तु संसारी भवति । यस्त्वेकमद्वितीयं सेव्यतयाङ्गीकरोति स तु मुक्त इति ॥ ५ ॥

त्वं पासि हंसि विदधासि तिरस्करोषि
मुक्तिं परां नयसि नित्यमशेषलोकान् ।
त्वं सर्वदोऽसि [4] शिव सर्वकरस्त्वमेव
मत्वाविक(ल्पमि)[ल्पइ]ति जन्तुर [5] लेपकः स्यात् ॥ ६ ॥

---

[1] मु.पु. देव ।
[2] झ. धिपति ।
[3] झ. परिपूजितं सन्तं ।
[4] क. सर्वप्रदोऽसि ।
[5] मु.पु रवेपकः ।

त्वमिति । त्वं भवान् । पासि पालयसि । हंसि संहरसि । विदधासि करोषि । सृजसीत्यर्थः । सृष्टिस्थितिलयकर्ता त्वमेवेति उपहित-स्वरूपमुक्तम् । अनुपहितं तावदाह । अनुपहितत्वं द्विविधम् वश्याविद्यत्वं कूटस्थत्वं चेति । आद्यं तावदाह—तिरस्करोषीति । तिरस्तिरोधानं आवरणं अविद्येत्यर्थः । करोषि प्रवर्तयसि अविद्यां नाटयसीत्यर्थः । द्वितीयं स्वरूपं तावदाह- मुक्तिं मोक्षं परां उत्कृष्टां ब्रह्मलोकप्राप्तिव्यतिरिक्तां कैवल्यं नयसि प्रापयसि । नयतेर्द्विकर्मकत्वादुभयत्र द्वितीया । नित्यं, पदसंस्कारपक्षे नपुंसकत्वम् । नित्यमित्यर्थः । यद्वा क्रियाविशेषणमेतत् । अशेषलोकान् समस्तजनान् । त्वं सर्वदोऽसि । सर्वाणि ऐहिकान्यामुष्मिकाणि च फलानि ददातीति सर्वदोऽसि । हे शिव ! [1]मङ्गलात्मक ! सर्वैर्देवैः मैलारादिभिः भवत्करप्रायैः श्रेयांसि करोतीति सर्वंकरः । यद्वा मैलारादयः फलप्रदातारः कराः हस्तप्रायाः प्रतिहस्ता यस्य स सर्वंकरः । त्वमेव । मत्वा आलोच्य । अविक(ल्पं)[ल्पः] विकल्पशू(न्यं)[न्यः] निर्गुण(मि)[इ]ति । एवंप्रकारेण । जन्तुः जननशीलः । अलेपकः अविद्यमानो लेपः अविद्याकृतो विक्षेपः । संसार इति यावत् । स्वार्थे कप्रत्ययः । [यस्य तादृशः] । स्यात् प्राप्तकाले लिङ् । लेपं न प्राप्नोति मुक्तो भवतीत्यर्थः ।

अत्रेत्थं पदयोजना—हे शिव ! अशेषलोकान् त्वं पासि त्वं हंसि त्वं विदधासि त्वं तिरस्करोषि नित्यं परां मुक्तिं नयसि त्वं सर्वदोऽसि त्वमेव सर्वंकर इति त्व(ा)मविक(ल्पं) [ल्पः इति] मत्वा जन्तुः अलेपकः स्यात् ।

अयं भावः—लोकानां सृष्टिस्थितिलयकर्तारं भवन्तमुपहितस्वरूपं ज्ञात्वा अनन्तरं नित्यकैवल्यस्वरूपं भवन्तमेव ज्ञात्वा मैलारादिरूपेण सर्वप्रदं भवन्तं ज्ञात्वा तदनन्तरं स्वयंज्योतिर्भगवानेक एवेति यस्तु मनुते स एव जीवन्मुक्तः । तस्यैव कैवल्यमुक्तिरिति ॥ ६

शाठ्येन येऽपि भगवन्तमनन्तशक्तिं
शम्भो भवन्तमभवं भविनो नमन्ति ।
तेऽप्यन्धकारमतिघोरकृतान्तदन्त-
यन्त्रान्तरालगहनं न पुनर्विशन्ति ॥ ७ ॥

---

[1] ज्ञा. मंगलस्वरूप ।

**शाठ्येने**ति ॥ शाठ्येन कापट्येन । येऽपि जनाः । अपिशब्दस्सम्भावनायाम् । भगवन्तं भवं संसारं निहत्य योगं ददातीति भगवान् (पूर्वोत्तरवर्ण)योगशब्दे पूर्ववर्णस्य (उत्तरशब्द)भवशब्दे उत्तरवर्णस्य च लोपात् भ(व)[ग]शब्दनिष्पत्तिः । भगौ भवयोगौ [हन्तृ]यत्वेन देयत्वेन [चास्मिन्]स्त इति भगवान् । तथा च कालाग्निरुद्रोपनिषत्—''अथ कस्मादुच्यते भगवान् यस्मादुच्चार्यमाण एव सर्वान् भगवान्? निहत्यात्मज्ञानं निरीक्षयति योगं गमयति तस्मादुच्यते भगवान्' इति । तं भगवन्तम् । अनन्तशक्तिं अनन्ताः शक्तयो रोदिकामोदिकेत्येवमादयः यस्य तम् । शम्भो ! सदाशिव ! भवन्तं त्वाम् । अभवं आद्यन्तशून्यम् । भविनः संसारिणः । नमन्ति । तेऽपि जनाः । अपिशब्दस्समुच्चये । अन्धकारं अविद्याम् । संसारमिति यावत् । अतिघोरकृतान्तदन्तयन्त्रान्तरालगहनं, अतिघो(रं)[राः] अतिक(ष्टं)[ष्टाः] कृतान्तस्य यमस्य दन्ताः दन्तपङ्क्तयः त एव यन्त्राणि तेषां अन्तरालानि तद्वद्गहनं न पुनर्विशन्ति ।

अत्रेत्थं पदयोजना—हे शम्भो ! ये भविनो (जनाः)शाठ्येनापि भगवन्तमनन्तशक्तिं अभवं भवन्तं नमन्ति तेऽपि (भविनो जनाः) अतिघोरकृतान्तदन्तयन्त्रान्तरालगहनं अन्धकारं न पुनर्विशन्ति ।

एतदुक्तं भवति—ये जनाः संसारदशापन्नाः परप्रतारणार्थं शिवपूजां कुर्वन्ति 'अनि(श्चयो)[च्छया]ऽपि संस्पृष्टो दहत्येव हि पावकः' इति न्यायेन [तेभ्योऽपि भवान्] मुक्तिं प्रयच्छति । अयं भावः—दाम्भिकत्वाद्यर्हानर्हविचारं भवानेव करोति । त्वन्नामस्तुतिस्तु दाम्भिकत्वादाम्भिकत्वादिविचारमन्तरेणैव मुक्तिप्रदत्वस्वभावा इति ॥ ७ ॥

कस्यापरस्य मकराहतघोरनक्र-
चक्रक्रमक्रमणलोलजला च गङ्गा ।
खण्डेन्दुकोटिकरकोदकभारमाजि
बभ्राम बभ्रुणि जटापटले विमूढा ॥ ८ ॥

**कस्ये**ति ॥ कस्यापरस्य ईश्वरादपरस्य ! मकराहतघोरनक्रचक्रक्रमक्रमणलोलजला मकरैः जलजन्तुविशेषैः आहताः ताडिताः घोरनक्राः कुम्भिलाः

---

'इदं वाक्यं मुद्रितकोशेषु नोपलभ्यते ।

तेषां चक्राणि सङ्घाः तेषां क्रमाः पादविक्षेपाः तैः क्रमणानि भ्रमरिप्रमुख-(नि)तिर्यगूर्ध्वाधोगमनविशेषाः तैर्लोलं कल्लोलितं (तरङ्गितं) जलं यस्यास्सा । चकारः चन्द्रसमुच्चयार्थः । गङ्गा भागीरथी । खण्डेन्दुकोटिकरकोदकभार-भाजि, खण्डेन्दुः चन्द्रशकलः स इव कोटिः नालो यस्य तत् । जटापटल-विशेषणमेतत् [तच्च] करक इव (मण्डलमिव) [मण्डलाकारं] उदकभारं उदकपूरं भजतीति करकोदकभाक्[च] तस्मिन् । यद्वा खण्डेन्दुकोटिश्चासौ करकश्च खण्डेन्दुकोटिकरकः स चासावुदकभारभाक्[च] तस्मिन् । अयमर्थः—बभ्रुवर्णजटापटलं ताम्रकरकः [इव] तस्य चन्द्रकला रजतनाल इव [च] प्रतिभाति । बभ्राम भ्रमति स्म । बभ्रुणि बभ्रुवर्णे । जटापटले जटाजूटे । विमूढा कान्दिशीका ।

यथा लोके काननं प्रविष्टो नागरिकजनः निस्सरणमार्गमज्ञात्वा तत्र विमूढो भ्रमति तद्वदित्यर्थः ।

अत्रेत्थं पदयोजना—हे सदाशिव ! अपरस्य कस्य खण्डेन्दुकोटि-करकोदकभारभाजि बभ्रुणि जटापटले मकराहतघोरनक्रचक्रक्रमक्रमणलोलजला च गङ्गा विमूढा(सती) बभ्राम । एतादृशो महिमा भवत्येव (विभ्रान्तो) [विश्रान्तो] नान्यस्मिन्निति भावः ।

अत्रातिशयोक्तिरलङ्कारः । खण्डेन्दोर्नालत्वेनाध्यवसानात् जटापटलस्य करकत्वेनाध्यवसानात् गङ्गाजलस्य करकोदकत्वेनाध्यवसानात् । भेदे अभेद-निबन्धनातिशयोक्तिः । किञ्च गङ्गाया विमूढत्वासम्बन्धेऽपि सम्बन्धोक्तेः असम्बन्धे सम्बन्ध[उक्तिनिबन्ध]नातिशयोक्तिः अनयोः संसृष्टिः ॥ ८ ॥

[1]भेरीमृदङ्गसुरदुन्दुभिशङ्खनाद-
देवाङ्गनाकलकलाकुलदिङ्मुखेषु ।
क्रीडन्ति दिव्यभवनेषु सहाप्सरोभिः
भक्त्या कृतं तव पुरो मुखवादनं यैः ॥ ९ ॥

**भेरीमृदङ्गे**ति । भेरीमृदङ्गसुरदुन्दुभिशङ्खनाददेवाङ्गनाकलकलाकुलदिङ्मुखेषु भेरी दुन्दुभिः, मृदङ्गः मर्दलः सुरदुन्दुभिः सुरैस्ताड्यमानो दुन्दुभिः सुरदुन्दुभिः, शङ्खः प्रसिद्धः, तेषां नादैः ध्वनिभिः, देवाङ्गनाः, अप्सरसः, तासां कलकलाः

[1] ज॰ पुस्तके अयं १० श्लोकः ।

संभ्रमोद्विग्नगमनवचनरचनादयः तैश्च आकुलानि बधिरितानि [दिङ्मुखानि] येषां तेषु । क्रीडन्ति दिव्यभवनेषु, दिवि भवानि दिव्यानि वाञ्छा-समधिकवस्तूपपन्नानि, भवनानि गृहाः, तेषु । सह साकम् । अप्सरोभिः उर्वश्यादिभिः । भक्त्या विश्वासपूर्वकभजनेन । कृतं रचितम् । तव भवतः । पुरः अग्रे मुखवादनं मुखेन शङ्खध्वानम् । ओष्ठद्वयं संपुटीकृत्य शङ्खाकारं कृत्वा हस्तेन तदोष्ठद्वयं पिधाय [कृतं] शङ्खध्वनिसदृशं(ध्वनिं) ध्वानमित्यर्थः । (कुर्वद्भिः) यैः ।

अत्रेत्थं पदयोजना—हे परमेश्वर ! तव पुरः यैर्जनैर्भक्त्या मुखवादनं कृतं ते भेरीमृदङ्गसुरदुन्दुभिशङ्खनाददेवाङ्गनाकलकलाकुलदिङ्मुखेषु दिव्यभवनेषु अप्सरोभिस्सह क्रीडन्ति ।

अयं भावः—वेदान्तवेद्यं भवन्तं वेदान्तार्थानुवादकैर्ये स्तुवन्ति ध्वन्यात्मक-शब्दैर्ये भवन्तं नमन्ति तेषामुभयेषां समानं लोकं ददासि । किं च ये देवतान्तरभजनशीलाः स्वकीयदेवताराधनसमये सङ्गीतशास्त्रानुसारेण स्वकीया-मिष्टदेवतां ध्वन्यात्मकवीणावादनेन प्रीणयन्ति[तेभ्यः](ताः) प्रीता देवता यत्फलं प्रयच्छन्ति ततोऽधिकं फलं मुखवादनमात्रेणैव [त्वां प्रीणयतस्त्वं] ददासीति । किञ्च ध्वन्यात्मकशब्दसध्रीचीनं भवदाराधनं ध्वन्यात्मकशब्द-सध्रीचीनं फलं ददातीति वस्तुना वस्तुध्वनिः ॥ ९ ॥

[1]प्रोत्तुङ्गपीवरघनस्तनभारनम्र-
विद्याधरीभुजलतायुगपाशबद्धाः ।
ते पर्यटन्ति भगवन् गगने विमानैः
यैरर्चितो हर नरैरुमया [2]युतस्त्वम् ॥ १० ॥

**प्रोत्तुङ्गेति** । प्रोत्तुङ्गपीवरघनस्तनभारनम्रविद्याधरीभुजलतायुगपाशबद्धाः, प्रोत्तुङ्गयोः अत्युन्नतयोः, पीवरयोः पृथुलयोः, घनयोः निबिडयोः अन्योन्य-संश्लिष्टयोरित्यर्थः स्तनयोः कुचयोर्भारेण गुरुत्वातिशयेन नम्राणां ईषन्नतमध्यानां विद्याधरीणां विद्याधरकान्तानां भुजलतयोर्युगं तदेव पाशः रज्जुः तेन बद्धाः गाढमालिङ्गिता इत्यर्थः । ते जनाः । पर्यटन्ति विचरन्ति । हे भगवन् ! गगने गगनमार्गे । विमानैः देवयानैः । यैः अर्चितः आराधितः । हर ! नरैः मनुष्यैः । उमया युतः मिलितः । त्वं भगवान् ।

[1] अ. पुस्तके अयं ९ श्लोकः ।    [2] क. सह ।

अत्रेत्थं पदयोजना - हे हर ! यैर्नरैः उमया युतस्त्वमर्चितः ते नरा गगने विमानै प्रोत्तुङ्गपीवरघनस्तनभारनम्रविद्याधरीभुजलतायुगपाशबद्धाः सन्तः पर्यटन्ति ।

अयं भावः--उमया संश्लिष्टदेहं भवन्तं ये आराधयन्ति तेषां विद्याधरीकुचाश्लेषसुखं भवतीति ।

अयमाशयः--

'वामाङ्कन्यस्तवामेतरकरकमलायास्तदा वामबाहु-
न्यस्तारक्तोत्पलायाः स्तनपरिविलसद्वामबाहुप्रियायाः
सर्वाकल्पाभिरामो धृतपरशुमृ(गेष्टः) [गाक्षः] करैः काञ्चनाभो
ध्येयः पद्मासनस्थः स्मरललिततनुः सम्पदे पार्वतीशः

इत्येतत् ध्यानं हृदि निधायोक्तं कवीश्वरेणेति ॥ १० ॥

'शम्भो प्रसिद्ध विबुधाधिप सिद्ध[1]साध्य-
विद्याधरा हरिपितामहलोकपालाः ।
अन्येऽपि साधुविधिना [2]सुखिनो भवन्त-
माराध्य जग्मुरमराः परमामरत्वम् ॥ ११ ॥

**शम्भो प्रसिद्धे**ति । हे शम्भो ! प्रसिद्ध प्रकर्षेण सिद्धरूप ! विबुधाधिप विशेषेण बोधवतामधिप ! रक्षक ! सिद्धसाध्यविद्याधराः सिद्धाश्च साध्याश्च विद्याधराश्च ते ! हरिपितामहलोकपालाः, हरिः विष्णुः पितामहः लोकपाला इन्द्रादयः । अन्येऽपि महर्षयः । अपिशब्दस्समुच्चयार्थः । साधुविधिना । साधुः सतां संमतः विधि अनुष्ठेयार्थः विधिवाक्यं च । काम्यव्यतिरिक्तनित्यनैमित्तिककर्माणि तत्प्रतिपादकश्च तेन साधुविधिना । सुखिनः जीवन्मुक्ताः सन्तः भवन्तं त्वाम् । आराध्य संभाव्य । जग्मुः गच्छन्ति स्म । अमराः देवाः मरणरहिताः अपरिच्छिन्नरूपत्वात् परमामरत्वं कैवल्यमुक्तिम् ।

---

[1] छ. साध्या । [2] क. ञ. सुधियो ; ज. कृतिनः ।

अत्रेत्थं पदयोजना—हे शम्भो ! विबुधाधिप ! प्रसिद्ध ! सिद्धसाध्य-विद्याधरा हरिपितामहलोकपालाः साधुविधिना भवन्तमाराध्य सुखिनः अमरास्सन्तः परमामरत्वं जग्मुः ।

अयं भावः—देवानामपि नित्यनैमित्तककाम्यकर्माधिकारोऽस्ति । 'देवा वै सत्रमासत' 'देवा वै देवयजनमध्यवसाय तेनेन्द्रमयाजयन्' 'इन्द्रो वा अकामयत' 'अग्निर्वा अकामयत' 'अश्विनौ हि देवानामध्वर्यावास्ताम्' इत्यादिश्रुतिसहस्रप्रामाण्यात् । (देवानां विद्याधिकारोऽस्ति ।) अत एव देवानामपि वर्णाश्रमविभागोऽस्त्येव । अत्र ज्ञापकं वाजपेये श्रूयते । 'स वा एष ब्राह्मणस्य चैव राजन्यस्य च यज्ञ' इति । राजन्य इन्द्रः । ब्राह्मणो बृहस्पतिरित्यर्थवादबललभ्यः । अतः सिद्धाः साध्याः ब्रह्मादयो दिक्पाला अन्ये महर्षयः साधुविधिना नित्यनैमित्तिकैः दुरितक्षयं कुर्वाणाः विमलान्तः—करणाः शिवभागवताः सुखिनः जन्ममरणशून्याः बाधितानुवृत्तदेहबन्धाः तदनन्तरं त्वदैकात्म्यं निरतिशयामरत्वं कैवल्यं मुक्तिं प्राप्नुवन्तीति ॥ ११ ॥

गौरीप्रदानसमये कथितेऽचलेन
गोत्रं तवेश किमिति क्षणजातचिन्तम् ।
[1]धन्यैः पितामहपुरन्दरलोकपालै-
र्दृष्टं निरुत्तरमुखं [2]भवतो हसद्भिः ॥ १२ ॥

**गौरीति** । गौरीप्रदानसमये गौर्याः पार्वत्याः प्रदानसमये कन्यादानसमये । कथिते निगदिते सति । अचलेन हिमवता । गोत्रं अन्ववायः । तव भवतः । ईश ! सदाशिव ! किमिति, किंशब्दः प्रश्ने । क्षणजातचिन्तं क्षणं क्षणमात्रं जाता उत्पन्ना चिन्ता मनोवैकल्यं वैलक्ष्यं यस्य तत् क्षणजातचिन्तम् । मुखविशेषणमेतत् । धन्यैः कृतार्थैः । प्रत्यक्षेण सदाशिवदर्शनाद्धन्यत्वम् । पितामहपुरन्दरलोकपालैः, पितामहो ब्रह्मा, पुरन्दर इन्द्रः लोकपाला अग्न्यादयः तैः । दृष्टं लक्षितम् । निरुत्तर—मुखं, निरुत्तरं निर्गतप्रतिवचनं । निरुत्तरं च तत् मुखं च निरुत्तरमुखम् । भवतः तव । हसद्भिः स्मितहसितवदनैरित्यर्थः ।

---

[1] ज अन्यैः । [2] मु.पु. हसतोऽभवद्भिः ।

अत्रेत्थं पदयोजना—हे ईश ! अचलेन गौरीप्रदानसमये तव गोत्रं किमिति कथिते सति क्षणजातचिन्तं भवतो निरुत्तरमुखं हसाद्भिः धन्यैः पितामहपुरन्दरलोकपालैर्दृष्टम् ।

अयं भावः—गोत्रनामपूर्वकं कन्यादानं कर्तव्यम् ।
'सङ्कीर्त्य नामगोत्रे च कन्यां दद्याद्यथार्हणम्' ॥

इति स्मृतेः । कन्यादानसमये हिमवता स्वगोत्रनामनी उच्चार्य वरनामगोत्रसङ्कीर्तनवेलायां वरस्वरूपं विस्मृत्य नामगोत्रे पृष्टः श्वशुरमालोक्य श्वशुरबुद्धिपर्यालोचनया वरो लज्जितं मुखं बभारेति ॥ १२ ॥

झङ्कारबम्भरविराजिजलाकुलेषु
कैलासमेरुगिरि[2]मन्दरनिर्झरेषु ।
ते प्राप्नुवन्ति सुरसिद्धवधू[3]रतानि
ये नीलकण्ठ तव पादयुगं नमन्ति ॥ १३ ॥

**झङ्कारेति** । झङ्कारबंभरविराजिजलाकुलेषु, झङ्कारयुक्ता बम्भरा झङ्कारबम्भराः भ्रमराः । झङ्कारिबम्भरेति वा पाठः । झङ्कारा येषां सन्तीति झङ्कारिणः ते च ते बम्भराश्च । तैः विराजि रम्यं दृश्यश्रव्यरूपेण । जलं उदकं तेन आकुलानि (बधिरीकृतश्रोत्राणि) तेषु । कैलासमेरुगिरिमन्दरनिर्झरेषु, कैलासश्च मेरुगिरिश्च मन्दरश्च तेषां निर्झरेषु झरेषु । कन्दरनिर्झरेष्विति वा पाठः । 'दरी तु कन्दरो वा स्त्री' इत्यमरः । निर्झरेष्विति समीपसप्तमी । गङ्गायां घोष इतिवत् । ते भक्ताः । प्राप्नुवन्ति । सुरसिद्धवधूरतानि, सुरवधूरतानि सिद्धवधूरतानि । मेरुकन्दरेषु सुरवधूरतानि कैलासकन्दरेषु सिद्धवधूरतानि इति विवेकः । ये जनाः । नीलकण्ठ ! शितिकण्ठ ! तव भवतः । पादयुगं चरणयुगम् । नमन्ति नमस्कुर्वन्ति ।

अत्रेत्थं पदयोजना—हे नीलकण्ठ ! ये तव पादयुगं नमन्ति ते झङ्कारबम्भरविराजिजलाकुलेषु कैलासमेरुगिरिमन्दरनिर्झरेषु सुरसिद्धवधूरतानि प्राप्नुवन्ति ।

---

[1] च. पुस्तके अयं १५ श्लोकः । [2] ज. गह्वर ।
[3] ज. व्रजानि ।

अयं भावः—एकान्तभवच्चरणाम्बुजानतिमतां मेरौ कैलासे मन्दरकुहरे वा अत्यन्तैकान्तस्थले पञ्चेन्द्रियनिर्वृतिरूपं फलं भवतीति । मिलिन्दझङ्कारैः श्रोत्रनिर्वृतिः । निर्झरसम्पर्कात् त्वगिन्द्रियनिर्वृतिः । अत्यन्तरम्यकुहरत्वाच्चक्षुरिन्द्रियनिर्वृतिः । झङ्कारबम्भरपदेन भ्रमराविनाभूतकमलप्रतीतेः घ्राणेन्द्रियनिर्वृतिः । एकादशेन्द्रियनिर्वृतिश्च सुरसिद्धवधूरतानि इत्यनेन प्रतीयत इत्यलमतिविस्तरेण ॥ १३ ॥

अभ्यन्तरपूजारतस्य रहस्यफलोपभोगः कथितः । बाह्यपूजारतस्य बाह्यफलोपभोगः कथ्यते—**अन्येऽरविन्देति** ।

[1] अन्येऽरविन्दमकरन्दहृतालिबृन्द-
मन्दारकुन्ददलदामभिरिन्दुमौले ।
पूजां विधाय भवतो विलसन्ति देव
देवेन्द्रमन्दिरवरैस्सह सुन्दरीभिः ॥ १४ ॥

अन्ये केचन बाह्यपूजारताः । अरविन्दमकरन्दहृतालिबृन्दमन्दारकुन्ददलदामभिः, अरविन्दानि पद्मानि । मकरन्देन पुष्परसेन, हृताः कृष्टाः अलयो भ्रमराः तेषां बृन्दं समूहः येषां तानि हृतालिबृन्दानि । मन्दाराणि कुन्दानि । अत्र मकरन्दहृतालिबृन्दानीति विशेषणं अरविन्दपदेनान्वेति मकरन्दहृतालिबृन्दानां अरविन्दानां मन्दाराणां कुन्दानां तेषां दलानि तेषां दामानि मालिकाः तैः । इन्दुमौले ! चन्द्रशेखर ! पूजां विधाय कृत्वा । भवतः तव । विलसन्ति । देव ! देवनशील ! देवेन्द्रमन्दिरवरैः, देवेन्द्रेण शचीपतिना निर्मितानि मन्दिरवराणि गृहश्रेष्ठानि तैः । यद्वा देवेन्द्रमन्दिरेभ्यः सकाशात् वरैः श्रेष्ठैः । यद्वा देवेन्द्रमन्दिरवरैस्सह तुल्यैरित्यर्थः । सुन्दरीभिः अप्सरोभिः ।

अत्रेत्थं पदयोजना—हे इन्दुमौले ! देव ! अन्ये अरविन्दमकरन्दहृतालिबृन्दमन्दारकुन्ददलदामभिः भवतः पूजां विधाय देवेन्द्रमन्दिरवरैः सह सुन्दरीभिः विलसन्ति ।

[1] च. पुस्तके अयं १३ श्लोकः ।

अयं भावः—देवेन्द्रोऽपि भवत्पूजातिशयसमासादितवैभव इति ॥ १४ ॥

अनादरेणापि कृतायाः अल्पीयस्याः शिवपूजायाः फलमाह—**गर्जत्प्रचण्डेति**

गर्जत्प्रचण्डघनघर्घरमेघसङ्घ-
सङ्घट्टघोषघनघोररवेण कोऽन्यः ।
श्वेतं नयन्तमतिघोरकरालकालं
भस्मावशेषमकरोद्धर हुंकृतेन ॥ १५ ॥

गर्जत्प्रचण्डघनघर्घरमेघसङ्घसङ्घट्टघोषघनघोररवेण, गर्जन्तः स्तनितानि कुर्वन्तः प्रचण्डाः अतिभयङ्कराः घनाः निबिडाः घर्घराः घरघरेतिशब्दाः येषा ते मेघाः गर्जन्तश्च ते मेघाश्चेति विशेषणसमासः । तेषां सङ्घाः समूहाः सङ्घट्टः परस्पर-घर्षणम् । तेन घोषः अशनिध्वनिः तद्वद्धनः सान्द्रः घोरो भयङ्करः स चासौ रवः ध्वनिः अट्टहास इत्यर्थः । तेन । कोऽन्यः । क इत्यत्र काकुः । अन्यो भवदन्यः । श्वेतं श्वेताख्यं भक्तम् । नयन्तं प्रापयन्तम् । अतिघोरकरालकालं, अतिघोरः अत्यन्तभीकरः करालः कादरसाविशिष्ट ? स चासौ कालो यम. तम् । भस्मावशेषं भस्माकारेणावशिष्यत इति भस्मावशेषः तम् । अकरोत् चकार । हे हर ! हुंकृतेन हुंकारेण ।

अत्रेत्थं पदयोजना—हे हर ! त्वत्तः कोऽन्यो देव गर्जत्प्रचण्डघन-घर्घरमेघसङ्घसङ्घट्टघोषघनघोररवेण श्वेतं नयन्तं, अतिघोरकरालकालं हुंकृतेन भस्मावशेषमकरोत् ॥ १५ ॥

मायया विरचितस्यापि शिवचिह्नधारणस्य फलमाह—**ये जीवनायेति** ।

ये जीवनाय [2]शिव भस्मजटास्थिमाला
मायाविनो दधति तेऽपि भवन्ति शम्भो ।
कर्णाटलाटभटहेमकिरीटकोटि-
सङ्घट्टघृष्टचरणा भुवि भूमिपालाः ॥ १६ ॥

ये जना जीवनाय स्वोदरपूरणाय । हे शिव ! भस्मजटास्थिमालाः । मायाविनः मायिकाः । परप्रतारणशीला इत्यर्थः । दधति धारयन्ति ।

[1] च. पुस्तके अयं १४ श्लोकः । [2] ख. भव ।

तेऽपि तादृशा अपि । भवन्ति । हे शम्भो ! कर्णाटलाटभटहेमकिरीटकोटिसङ्घट्टघृष्टचरणाः कर्णाटो देशविशेषः । लाटो देशविशेषः । उपलक्षणमेतत् काम्भोजादीनाम् । तेषु भटाः क्षुद्रराजानः । तेषां हेमकिरीटानि तेषां कोटयः अग्राणि तैः सङ्घट्टः सङ्घट्टनम् तेन घृष्टौ बर्बरीभूतौ चरणौ येषां ते । भुवि भूलोके । भूमिपाला राजानः

अत्रेत्थं पदयोजना—हे भव ! शम्भो ! ये जनाः जीवनाय मायाविनः भस्मजटास्थिमाला दधति तेऽपि भुवि कर्णाटलाटभटहेमकिरीटकोटिसङ्घट्टघृष्टचरणाः भूमिपाला भवन्ति ।

अयं भावः—जीवनार्थमेव ये च मायाविनो भूत्वा शिवचिह्नधारणात् [शिवचिह्नानि धारयन्ते] तेषामैहिकफल एवात्यन्तप्रीतिरिति तच्चिह्नधारणं तेषामैहिकमेव भूलोकाधिपत्वं फलं प्रयच्छतीति ॥ १६ ॥

परिहासेनापि कृतायाः शिवपूजायाः फलमाह—**क्रीडाप्रपञ्चेति** ।

क्रीडाप्रपञ्चनिरताः शिशवो भवन्त-*<br>
[1]मभ्यर्चयन्ति भुवि येऽपि जलैस्तृणाद्यैः ।<br>
देवादिदेव दिवि दिव्यविमानगानां<br>
तेऽपि प्रियत्वमुपयान्ति सुराङ्गनानाम् ॥ १७ ॥

क्रीडाप्रपञ्चनिरताः क्रीडाया विनोदरचनायाः प्रपञ्चः बाहुल्यं तत्र निरताः । पित्रादिभिः वृद्धैः यत्कर्मानुष्ठीयते तदनुकरणशीला इत्यर्थः । विहितकर्मणोऽनुकरणं नाट्यमित्युपहासः । शिशवो बालाः । भवन्तं त्वाम् । अभ्यर्चयन्ति पूजयन्ति । भुवि भूतले । येऽपि बाला जलैः अपवित्रैः तृणाद्यैः । हे देवादिदेव ! देवानां ब्रह्मादीनामादिदेव ! ब्रह्मादीनां जनक ! दिवि स्वर्गे लोके । दिव्यविमानगानां दिव्यविमानानि गच्छन्तीति दिव्यविमानगाः तासाम् तेऽपि बालाः । प्रियत्वं प्राणेश्वरत्वम् । उपयान्ति गच्छन्ति । सुराङ्गनानां अप्सरसाम् ।

---

* भ. मातृकायां इतःपरं अलत्यविंशश्लोकस्यान्तिमं पादत्रयमुपलभ्यते । १५ श्लोको नोपलभ्यते ।

[1] ग, घ, ङ, च, छ, ज, ञ, माराधयन्ति ।

[2] घ, ङ, च, छ, ज, पुष्पजलै ।

ट. पुष्पफलै ।

अत्रेत्थं पदयोजना—हे देवादिदेव ! येऽपि शिशवः क्रीडाप्रपञ्चनिरतास्सन्तः जलैः तृणाद्यैः भुवि भवन्तमभ्यर्चयन्ति तेऽपि दिवि दिव्यविमानगानां प्रियत्वमुपयान्ति ॥ १७ ॥

ये जीवनाथ (१६) इत्यस्मिन् श्लोके शिवपूजा भूलोकसाम्राज्यसौख्यप्रदायिनीत्युक्तम् । क्रीडाप्रपञ्च (१७) इति श्लोके स्वर्गसौख्यदायिनीत्युक्तम् । इदानीं पाताललोकसौख्यदायिनी शिवपूजेत्युच्यते—**पाताललोके**ति ।

[1] पाताललोकफणिदानव[2]कामिनीभिः
 आलिङ्गिता मकरकेतुशरातुराभिः ।
ते शेरते ध्वजपटाकुलमन्दिरेषु
 येषां त्वमेव शिव [3]पुण्यवतां प्रसन्नः ॥ १८ ॥

पाताललोकः अधोभुवनम् । फणिनश्च दानवाश्च फणिदानवाः तेषां कामिन्यः ताभिः । आलिङ्गिताः । मकरकेतुशरातुराभिः मन्मथबाणताडिताभिः । ते भक्ताः । शेरते स्वपन्ति । ध्वजपटाकुलमन्दिरेषु सौधेषु । वारकान्तागृहेष्वित्यर्थः । 'ध्वजिनो गणिकागृहा' इत्यभिधानात् । येषां त्वमेव शिव ! पुण्यवतां सुकृतवतां । भवत्पूजारतानामित्यर्थः । प्रसन्नः संप्रीतः ।

अत्रेत्थं पदयोजना—हे शिव ! येषां पुण्यवतां त्वं प्रसन्नः त एव ध्वजपटाकुलमन्दिरेषु मकरकेतुशरातुराभिः पाताललोकफणिदानवकामिनीभिः आलिङ्गिताः सन्तः शेरते ।

अयं भावः—स्वर्गमर्त्य[पाताल]सौख्यानुभवो भवत्पूजायत्त एवेति ॥ १८ ॥

[4] स्वर्गे विचित्रसुरपादपमञ्जरीभिः
 मन्दाकिनीकनकपङ्कजयोजिताभिः ।
इन्द्राप्सरोभिरमरैरसुरैरुपेतः
 पूजां विधाय भवतः प्रणतो महेश ॥ १९ ॥

**स्वर्गे**त्यादि । स्वर्गे सुरलोके । विचित्रसुरपादपमञ्जरीभिः विचित्राः नानाविधवर्णाः सुरपादपमञ्जर्यः ताभिः । मन्दाकिनीकनकपङ्कजयोजिताभिः,

---

[1] ञ. पुस्तके अयं विंशःश्लोकः । [2] क. ञ. सुन्दरीभिः ।
[3] क. पुण्यकथाप्रसन्नः । [4] ञ. पुस्तके अयं एकविंशः श्लोकः ।

मन्दाकिन्या आकाशवाहिन्याः कनकपङ्कजैः योजिताभिः । इन्द्राप्सरोभिः इन्द्रसहिताभिः [अप्सरोभिः] । अमरैः अग्न्यादिलोकपालैः । असुरैः दानवैः । उपेतः समीपं प्राप्तः । सेवित इत्यर्थः । पूजां सपर्याम् । विधाय कृत्वा । भवतः तव । प्रणतः प्रकर्षेण मनोवाक्कायैर्नतः । महेश! महांश्चासौ ईशश्च महेशः तस्य सम्बुद्धिः हे महेश! अत्र महच्छब्दः पूज्यवाची । महच्छब्दव्यावर्त्यस्येश्वरस्याभावात् । अतश्च 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति समासः । 'न तु विशेषणं विशेष्येण' इति ध्येयम् ।

अत्रेत्थं पदयोजना—हे महेश ! भवतः पूजां विधाय यस्तु प्रणतः स स्वर्गे मन्दाकिनीकनकपङ्कजयोजिताभिः विचित्रसुरपादपमञ्जरीभिः उपलक्षितः इन्द्राप्सरोभिः अमरैरसुरैश्चोपेतः ।

अयं भावः—हे परमेश्वर ! यो भक्तः भूलोके शुद्धोदकेन बिल्वपत्रादिना वा भवन्तं सम्पूज्य सम्यक् प्रणतः स भवान्तरे स्वर्गं प्राप्नोति । तत्पूजाविधौ इन्द्रादयो लोकपाला अप्सरोगणाश्च असुराश्च कल्पवृक्षकुसुमानि कनकपङ्कजानि च आनीय तत्पूजावसरं प्रतीक्ष्य द्वारि निवसन्तीति ।

अत्रेदं तत्त्वम्—शिवपूजायाः फलं जन्मान्तरसहस्रेऽपि शिवभक्तिः, शिवपूजारतिः, इन्द्रादिलोकपालोपजीव्यत्वमिति, शिवपूजाव्यतिरिक्तमुपायान्तरं सम्पदां नास्तीति ॥ १९ ॥

सम्पदां शिवपूजाव्यतिरिक्तमुपायान्तरं नास्तीत्युक्तम् । तदेवाह—**ध्यायन्ती**ति ।

ध्यायन्ति योगनिरता मुनयो भवन्तं
आराधयन्ति विविधेषु वनेषु देवाः ।
सिद्धाः समस्तकुलशैल[1]महोदरेषु
विद्याधरा मलयमन्दरकन्दरेषु ॥ २० ॥

ध्यायन्ति ध्यानं कुर्वन्ति । योगनिरताः अष्टाङ्गयोगनिरताः । मुनयो मननशीलाः भवन्तं त्वाम् । यद्वा भवन्तं सर्वदा वर्तमानं सन्तमित्यर्थः । आराधयन्ति पूजयन्ति । विविधेषु वनेषु नन्दनादिषु । देवाः सुराः ।

---

[1] क. गुहान्तरेषु ।

सिद्धाः कपिलादयः । समस्तकुलशैलमहोदरेषु समस्तानां कुलशैलानां महोदरेषु गह्वरेषु । विद्याधराः देवयोनिविशेषाः । मलयमन्दरकन्दरेषु, मलयो मलयाचलः, मन्दरो मन्दराद्रिः तयोः कन्दराणि तेषु ।

अत्रेत्थं पदयोजना—हे सदाशिव ! भवन्तं मुनयो योगनिरता ध्यायन्ति । विविधेषु वनेषु देवा आराधयन्ति । सिद्धाः समस्तकुलशैलमहोदरेषु आराधयन्ति । विद्याधरा मलयमन्दरकन्दरेष्वाराधयन्ति ।

अयं भावः—योगीश्वराः सर्वदा वर्तमानं भवन्तं ध्यात्वा स्वरूपावस्थानं प्राप्नुवन्ति । स्वरूपावस्थानप्राप्तिकामानां स्वरूपावस्थानमेव फलम् । देवसिद्धविद्याधराणां भवत्समाराधनमेव देवत्वादिप्रापकमिति भुक्तिमुक्तिफलदायकं भवत्समाराधनमेवेति ॥ २० ॥

पाताललोकेऽपि भवानेवाराध्य इत्याह—हे देवेति ।

हे देव हेमपुररम्यरसातलेषु
नागाङ्गनाभिरसुरेन्द्रनितम्बिनीभिः ।
नित्यं नितम्बभरमन्दरगामिनीभिः
आराध्यसे च हर मन्मथविह्वलाभिः ॥ २१ ॥

हे देव ! भो स्वामिन् ! हेमपुररम्यरसातलेषु हेमपुरं हिरण्यपुरं केशिदानवनगरं तेन रम्याणि रसातलानि तेषु । नागाङ्गनाभिः नागकान्ताभिः । असुरेन्द्रनितम्बिनीभिः, असुरेन्द्राणां बलिचक्रवर्तिप्रभृतीनां नितम्बिनीभिः वरारोहाभिः । नित्यं चिरकालम् । नितम्बभरमन्दरगामिनीभिः, नितम्बभरेण श्रोणिभारेण मन्दरं यथा भवति तथा गामिनीभिः गमनशीलाभिः । आराध्यसे च सेव्यसे । चकारः समुच्चयार्थः । हर ! सदाशिव ! मन्मथविह्वलाभिः काममोहिताभिः ।

अत्रेत्थं पदयोजना—हे देव ! हेमपुररम्यरसातलेषु नितम्बभरमन्दरगामिनीभिः मन्मथविह्वलाभिः सतीभिः हे हर ! नागाङ्गनाभिः असुरेन्द्रनितम्बिनीभिश्च नित्यं आराध्यसे प्रार्थ्यसे ।

अयं भावः—पाताललोकेऽपि प्राप्ते नागकन्यका असुरकन्यकाश्च स्वाभिलषितपतिसिद्ध्यर्थं भवन्तमाराधयन्ति । आराध्य भवन्तं पतिं लभन्ते ॥ २१ ॥

दिव्यौषधीरसरसायनधातुवाद[1]-
योगा वशीकरणगारुड[2] शून्यवादाः ।
पातालखड्गुघुटिकाञ्जनमन्त्रवादाः
सिध्यन्ति तस्य शिव यस्य भवान् प्रसन्नः ॥ २२ ॥

**दिव्यौषधीति** । दिव्यौषधीरसरसायनसाधुवादयोगाः दिव्याः दिव्यविमानाः ओषध्यः · · · कीर्तिताः । रसः पारदः रसायनं जरामरणनिवारकं औषधम् । धातुवादाः । तेषां योगाः युज्यन्त इति योगाः । औषधद्वितयत्रितयचतुष्टयमेलनं योगः । वशीकरणगारुडशून्यवादाः, वशीकरणवादः गारुडवादः शून्यवादः · · · · · · (निधित) इत्यर्थः । पातालखड्गघुटिकाञ्जनमन्त्रवादाः, पातालप्रापकयक्षिणीमन्त्रवादः खड्गदायकयक्षिणीमन्त्रवादः घुटिकाप्रापकयक्षिणीमन्त्रवादः । घुटिका नाम अग्निस्तम्भजलस्तम्भखड्गस्तम्भशुक्रस्तम्भादिकारिणी । अञ्जनमन्त्रवादः अञ्जनप्रदायिमन्त्रवादः । अञ्जनं नाम भूगतनिधिप्रदर्शकम् । मन्त्राः नित्यनाथीयप्रोक्ताः । तेषां वादाः । अत्र वादशब्देन घुटिकाञ्जनपातालप्रवेशादृश्यकरणीवादवश्यपयस्तम्भादयः (शनैश्च दृष्टाः) तेऽपि भवदनुग्रहे सति सिध्यन्तीति भावः । सिध्यन्ति तस्य शिव! यस्य भवान् प्रसन्नः । तस्य सिध्यन्ति यस्य भवान् प्रसन्न इत्येकान्वयः । यद्वा यस्य भवान् प्रसन्नः तस्य सिध्यन्तीति वा? ॥ २२ ॥

[3]ज्ञानं त्रिकालविषयं गगनेचरत्वं
ऐश्वर्यमष्टगुणितं श्रवणं च दूरात् ।
उत्क्रान्तिमुक्तिपरकायपुरप्रवेशाः
शम्भो भवन्ति [4]भविनां भवतः प्रसादात् ॥ २३ ॥

**ज्ञानमित्यादि** । ज्ञानं तत्त्वज्ञानम् । त्रिकालविषयं भूतभविष्यद्वर्तमानगोचरम् । भूतभविष्यतोः कालयोर्वर्तमानतया प्रतिभानम् । गगनेचरत्वं खेचरत्वम् । ऐश्वर्यं महिमा । अष्टगुणितं अष्टसंख्यासंख्येयम् । श्रवणं च दूरात् दूरश्रवणं इत्यर्थः । उत्क्रान्तिमुक्तिपरकायपुरप्रवेशाः,

---

[1] मु पु. क, ख, घ, ङ, च, छ, ज; दाः ।

[2] मु पु. क, ख, ग, घ, ङ, च, छ, ज, ञ, ट; खन्य ।

[3] ञ. पुस्तके अयं त्रयोविंशः श्लोकः । [4] घ. ङ, छ; भविनो ।

उत्क्रान्तिः स्वेच्छामरणम्, मुक्तिः स्वेच्छया शृङ्खलादिबन्धविमुक्तिः कवाटादि-बन्धविमुक्तिश्च परकायप्रवेशश्च। शम्भो! भवन्ति भविनां संसारिणाम्। भवतः प्रसादात् हे शम्भो भवतः प्रसादादित्यन्वयः॥ २३॥

[1]त्वां दीप्यमानमकुटो[2]त्कटचारुहार-
केयूरकुण्डलधरा गिरिगह्वरेषु।
गन्धर्वलोकललना ललितैर्वचोभिः
उच्चैः कृताञ्जलिपुटा भगवन् स्तुवन्ति॥ २४॥

**त्वा**मिति। त्वां भवन्तम्। दीप्यमानमकुटोत्कटचारुहारकेयूरकुण्डलधराः दीप्यमानानि उज्वलानि मकुटानि, [उत्कटानि] स्थूलानि चारूणि, हाराश्च केयूराणि [च] कुण्डलानि च तथोक्तानि तेषां धराः पचाद्यच्। गिरिगह्वरेषु पर्वतगुहासु। गन्धर्वलोकललनाः गन्धर्वकान्ताः। ललितैः श्रेष्ठैः। वचोभिः वाक्यैः। उच्चैः मुक्तकण्ठम्। कृताञ्जलिपुटाः कृतः अञ्जलिपुटो नमस्कारमुद्रा याभिस्ताः। हे भगवन्! षड्गुणैश्वर्यसम्पन्न! स्तुवन्ति।

अत्रेत्थं पदयोजना—हे भगवन्! त्वां दीप्यमानमकुटोत्कटचारुहारकेयूर-कुण्डलधराः गन्धर्वलोकललनाः गिरिगह्वरेषु कृताञ्जलिपुटाः सत्यः ललितैर्वचोभिः स्तुवन्ति॥ २४॥

उक्तं शिवेति शिव येन दिवा च रात्रौ
उत्कण्ठया हर हरेति वृथापि येन।
सत्यं ब्रवीमि सुरनाथ न पक्षपातात्
मूढोऽपि घोरनरका[3]त्स बिभेति कस्मात्॥ २५॥

**उक्त**मिति। उक्तं कथितम्। शिवेति शिवशिवेत्यर्थः। हे शिव। येन जनेन। दिवा च रात्रौ च। चकारो वाशब्दार्थः। दिवा वा रात्रौ वा एकदा वा सर्वदा वा इत्यपि वाशब्दार्थः। उत्कण्ठया औत्सुक्येन। सन्तोषातिशयेनेत्यर्थः। हरहरेति वृथापि निरर्थकमपीत्यर्थः। येन जनेन। सत्यं यथार्थं ब्रवीमि। हे सुरनाथ! देवाधिप! न पक्षपातात् ल्यब्लोपे पञ्चमी। पक्षपात-मवलम्ब्येत्यर्थः। मूढोऽपि जडोऽपि। घोरनरकात्। सः मूढः। बिभेति भयं प्राप्नोति। कस्मात् किमाक्षेपे।

---

[1] ज. पुस्तके अयं द्वाविंशः श्लोकः। [2] क. च; ज्ज्वलताल।

[3] ङ. च।

अत्रेत्थं पदयोजना—येन जनेन उत्कण्ठया वृथापि शिवशिवेति दिवा च रात्रौ वा उक्तम्, अपि च येन जनेन हर हरेति वृथा दिवा रात्रौ वा उत्कण्ठया उक्तं हे सुरनाथ! सत्यं ब्रवीमि पक्षपातात् न ब्रवीमि। स मूढो जनः कस्मात् घोरनरकाद्बिभेति। न कस्मादित्यर्थः।

अयं भावः—शिव शिवेति हरहरेति वीप्सितं पदद्वयं। अद्भुतदर्शने निरर्थकं निपातमाहुः। 'शिला कम्पं धत्ते शिव शिव वियुङ्क्ते कठिनताम्' इत्यादौ शिवशिवेति पदद्वितयं आश्चर्यद्योतकं न तु शिवसम्बुद्धिवाचकम्। अतो निरर्थकम्। अत उक्तं वृथापीति।

अत्रेदं तत्त्वम्—शिव शिवेति वचनस्य अद्भुतार्थवर्णद्वयं उच्चरितं सत् फलं ददाति। सम्बोधनपरत्वे सम्बोध्यः शिवः फलं ददाति। तदभावे शिवशिवेति वर्णद्वयमेव फलं ददातीति कवेरभिप्रायः। अतश्च सत्यं ब्रवीमि न पक्षपातादिति सङ्गच्छते ॥ २५ ॥

चर्यावबोधरहि[1]तो भव भक्ति[2]मात्रा
नीतस्त्वया शिवपुरं यदहो किरातः।
यातः स्मरन् कपटकापुरुषोऽमरत्वं
यद्येव मुक्तिरसमा भवतः प्रसादात् ॥ २६ ॥

**चर्यावबोधरहित** इति। चर्यावबोधरहितः चर्या गुरूपदेशमार्गेण शिवपूजाचरणम्। तस्या अवबोधो विज्ञानं तद्रहितः। हे भव! भक्तिमात्रा भक्तिशब्दो विश्वासवचनः। मात्रा लेशः। विद्यते [इति शेषः] नीतः। त्वया शिवपुरं कैलासम्। यत् यस्मात्कारणात्। अहो इति सम्बुद्धिः। किरातः कण्णप्पाख्यः। यातः प्राप्तः। स्मरन् भवन्तमुद्दिश्य तपः कृत्वेति यावत्। कपटकापुरुषः कपटेन कापट्येन कापुरुषः कुत्सितपुरुषः। भवदपकारिक[नक]स्वामिप्रभृतिः। अमरत्वं देवत्वम्। यदि असंशयोक्तौ। एवेत्यवधारणे। मुक्तिः मोक्षः। असमा असदृशी। भवतः प्रसादात् त्वदनुग्रहात्।

---

[1] घ, ङ, छ, ञ; तः शिव। ज. तस्तव।

[2] मु.पु. क, ख, घ, ङ, च, ञ; मात्रात्।

[3] ञ. 'पुस्तके जातिस्मरत्वमथवा परमारमत्वं ये त्वां विमुक्तिरथवा भवतः प्रसादात्' इति दृश्यते।

अत्रेत्थं पदयोजना—अहो भव! किरातः चर्याविबोधरहितः यत् यस्मात्कारणात् त्वया शिवपुरं नीतः तत्र कारणं भक्तिमात्रा विद्यते। कपटकापुरुषः कनकस्वामी भवन्तं स्मरन् अमरत्वं यातः यदि भवतः प्रसादात् असमा मुक्तिरेव।

अयं भावः—किरातस्य त्वयि भक्तिर्विद्यत एव। तस्य कैलासप्राप्तिर्युक्तैव। कनकस्वामिनस्तु त्वय्यभक्तिः। तस्याप्यमरत्वप्राप्तिर्निश्चीयते। मुक्तिहेतुः भक्तिर्वा अभक्तिर्वा न भवति अपि तु भवत्प्रसाद एवेति। अतश्च कनकस्वामिनः तपसा प्रसन्नः अमरत्वं दत्तवानिति भवत्प्रसाद एव मुक्तिप्रद इत्यविवादम्॥ २६॥

तस्यै कदन्नमतिभीकरमप्रमेयं
मूढेन शङ्कर मया यदकारि पापम्।
सत्यं पशुष्विति मदं च ममाशु [1]भिन्धि
छिन्धि प्रसह्य [2]भवसम्भवपा[3]शजालम्॥ २७॥

**तस्यै कदन्न**मिति। तस्यै प्रेयस्यै भुजिष्यायै। कुदन्नं तद्भुक्तान्नमित्यर्थः। तस्याः स्वानुरागं प्रकटीकर्तुं तया सार्धं भुक्तमित्यर्थः। तदेव कदन्नं भक्षणद्वारा पापहेतुः। तदपि कदन्नमेव पापमिति कार्यकारणयोरभेदोपचारादुक्तम्। अतिभीकरं स्वजातितिरस्कारहेतुत्वात् जुगुप्सितमित्यर्थः। अप्रमेयं प्रमातुमयोग्यं अप्रमेयं प्रामाणिकानां न श्रावयितव्यम्। प्रमाणविरुद्धमिति यावत्। लोके हि प्रामाणिकानां पुरतो ज्ञानतोऽज्ञानतो वा प्रमाददशायां [कृतं] तत् पापं प्रायश्चित्तार्हं निवेदनीयम्। वेश्यया सह भोजनं प्रामादिकमपि न [निवेदनीयं] भवति यतो न सभ्यं तत्। अत उक्तमप्रमेयमिति। मूढेन मोहाविष्टेन। शं सुखं मोक्षरूपं करोतीति शङ्करः। तस्य सम्बुद्धिः हे शङ्कर! मया मल्हणेन। यदिति। अकारि कृतम्। पापं दुरितम्। सत्यं सदुक्तम्। पशुषु। पश बन्धन इत्यस्माद्धातोः पशुशब्दो निष्पन्नः। पशवः बद्धाः अविद्यापाशबद्धा तेषु। इति कृत्वा। मदं चानुरागं च। चकारः उक्तसमुच्चयार्थः। [भिन्धि]भिदिर् विदारणे। मदात् अस्मात् त्याजय। अहंममाभिमानं नाशयेति यावत्। छिन्धि छेदय। प्रसह्य बलात्कारेण। भवसम्भवपाशजालं भवः संसारः [तत्र], सम्भवा उत्पन्नाः। पाशा अविद्याविक्षेपाः, तेषां जालं समूहम्।

---

[1] मु.पु. छिन्धि। [2] घ, छ; कृपया भव।
[3] च. पात।

अत्रेत्थं पदयोजना—हे शङ्कर ! अतिभीकरमप्रमेयं यदिदं तस्यै कदन्नं मूढेन मया अकारि । तत्पापं पशुषु सत्यमिति कृत्वा मम मदं आशु भिन्धि । भवसम्भवपाशजालं प्रसह्य छिन्धि ॥ २७ ॥

त्वत्पादपूजनरता मुनयो वनेषु
तिष्ठन्ति मूलफलकन्दजलाशिनो ये ।
ते यान्ति मुक्तिपदमीश्वर तावदास्तां
धन्यास्तु ते तव मुखान्यवलोकयन्ति ॥ २८ ॥

**त्वत्पादपूजनरते**ति । त्वत्पादपूजनरताः भवच्चरणाम्बुजाराधनपराः । मुनयो योगीश्वराः । वनेषु तपोवनेषु । तिष्ठन्ति त्यक्तगमना भवन्ति । मूलफलकन्दजलाशिनः मूलानि, फलानि चूतादीनि, कन्दाः सूरणादयः, जलानि उदकानि, अश्नन्तीति मूलफलकन्दजलाशिनः । ये मुनयः । ते योगीश्वराः यान्ति । मुक्तिपदं कैवल्यमुक्तिम् । ईश्वर ! तावदास्तां तिष्ठतु । अनादरे लोट् । धन्यास्तु कृतार्थाः । तुशब्दो व्यावृत्त्यर्थः । ते तव भवतः । मुखानि वक्त्राणि । अवलोकयन्ति पश्यन्ति ।

अत्रेत्थं पदयोजना—हे ईश्वर ! मुनयो मूलफलकन्दजलाशिनः त्वत्पादपूजनरताः वनेषु तिष्ठन्ति । ते मुक्तिपदं यान्त्येव । तत्तावदास्ताम् । किं तु ते धन्यास्तव मुखान्यवलोकयन्ति । यावत्कालं तव मुखान्यवलोकयन्ति तावत्कालं धन्या इति निश्चीयत इत्यर्थः ।

अयं भावः—यद्यपि सामीप्यमुक्तेः सायुज्यमुक्तिरेव गरीयसी । तथापि जीवन्मुक्तौ सेव्यसेवकभावे विद्यमाने सर्वदा त्वन्मुखावलोकनकौतूहलाविच्छेदात् सायुज्यमुक्तेः सामीप्यमुक्तिः समीचीनेव प्रतिभाति । अत उक्तं धन्यास्तु इति २८ ॥

स्फीतप्रथिम्नि जघने घनपाटलिम्नि
बिम्बाधरे कुचयुगे द्युतिपिञ्जरिम्णि ।
स्त्रीणां महेश विलसन्ति कुतो नरास्ते
यैर्नार्चितोऽसि न नतोऽसि न संस्तुतोऽसि ॥ २९ ॥

**स्फीतप्रथिम्नी**ति। स्फीतप्रथिम्नि स्फीतः प्रथितः प्रथिमा पृथुत्वं यस्य तस्मिन्। जघने श्रोणिबिम्बे। घनपाटलिम्नि घनः पाटलिमा श्वेतरक्तवर्णो यस्य तस्मिन्। बिम्बाधरे बिम्बाकारोऽधरो बिम्बाधरः। मध्यमपदलोपी समासः, तस्मिन्। कुचयुगे कुचयोर्युगं तस्मिन्। द्युतिपिञ्जरिम्नि द्युत्या कान्त्या पिञ्जरिमा वर्णः यस्य तस्मिन्। पिञ्जरद्युतिनि कुचयुगे इत्यर्थः। पीतरक्तः पिञ्जरवर्णः। स्त्रीणां। हे महेश! सदाशिव! विलसन्ति रमन्ते। कुतः कुतो हेतोः। अत्र काकुः। नरा मनुष्याः। यैः मानवैः नार्चितोऽसि मनसा न पूजितोऽसि। न नतोऽसि कायेन न पूजितोऽसि। न संस्तुतोऽसि वाचा न पूजितोऽसि।

अत्रेत्थं पदयोजना—हे महेश! ते नराः स्त्रीणां स्फीतप्रथिम्नि जघने घनपाटलिम्नि बिम्बाधरे द्युतिपिञ्जरिम्नि कुचयुगे कुतो विलसन्ति। यैरर्चितो नासि। यैस्संस्तुतो नासि। यैर्नतो नासि। अत्र असीति पदत्रितयं त्वमित्यर्थेऽव्ययम् ॥ २९ ॥

प्रोद्दामकाममदिरामदलोलनेत्राः
 रत्नावलीझणझणारवरम्यगात्राः।
ते यक्षलोकवनितास्सुचिरं रमन्ते
 ये त्वां स्तुवन्ति सततं मकरध्वजारे ॥ ३० ॥

**प्रोद्दामे**ति। प्रोद्दामकाममदिरामदलोलनेत्राः, प्रोद्दामश्चासौ कामश्च प्रोद्दामकामः कामोद्रेकः तेन मदिरामदः मद्यजनितमदः तेन लोलिते घूर्णिते नेत्रे यासां ताः। रत्नावलीझणझणारवरम्यगात्राः, रत्नानामावल्यो येषां ते कङ्कणनूपुराद्य तेषां झणझणारवैः रम्याणि कमनीयानि गात्राणि शरीराणि यासां ताः। अत्र 'अङ्गगात्रकण्ठेभ्यो वेष्यते' इति वचनात् ङीषभावः। ते भक्ताः। यक्षलोकवनिताः। यक्षाङ्गनाः। द्वितीया विभक्तिः। सुचिरं चिरकालं रमन्ते क्रीडन्ति। ये भक्ताः। त्वां भवन्तम्। स्तुवन्ति स्तोत्रं कुर्वन्ति। सततं ततेन तन्त्रिणा वीणादिवाद्येन सहितं यथा भवति तथा। क्रियाविशेषणमेतत्। मकरध्वजारे! मन्मथरिपो!

अत्रेत्थं पदयोजना—हे मकरध्वजारे! ये भक्ताः सततं त्वां स्तुवन्ति ते भक्ताः प्रोद्दामकाममदिरामदलोलनेत्राः, रत्नावलीझणझणारवरम्यगात्राः यक्षलोकाङ्गनाः सुचिरं रमन्ते।

अयं भावः वीणावादनसमाराधितः परमेश्वरः वीणादिवादनविलसितं यक्षकन्यासम्भोगसुखं प्रयच्छतीति ॥ ३० ॥

एतद्विभागपरिकल्पनकल्पितेषु
सम्यग्भवन्ति विविधेषु शिवव्रतेषु ।
ते चारुतुङ्गघनकुङ्कुमपिञ्जरेषु
स्त्रीणां महेश विलसन्ति कुचान्तरेषु ॥ ३१ ॥

**एतद्विभागपरिकल्पने**ति। एतद्विभागपरिकल्पनकल्पितेषु, एतदिति विभागः एतद्विभागः इदन्तया विभागः। विभागस्य परिकल्पनं सङ्कल्पनं तेन कल्पितेषु निश्चितेषु। सम्यक् दृढं यथा भवति तथा। भवन्तिं। शिवव्रतेषु दृढचित्तास्तिष्ठन्तीत्यर्थः। ते भक्ताः। चारुतुङ्गघनकुङ्कुमपिञ्जरेषु, चारुषु रम्येषु तुङ्गेषु उन्नतेषु घनेषु निबिडेषु कुङ्कुमपिञ्जरेषु पीतरक्तेषु। स्त्रीणां वरवर्णिनीनाम्। महेश! सदाशिव! विलसन्ति रमन्ते। कुचान्तरेषु कुचमध्येषु।

अत्रेत्थं पदयोजना— हे महेश! ये भक्ताः, एतद्विभागपरिकल्पनकल्पितेषु विविधेषु शिवव्रतेषु सम्यग्भवन्ति। ते स्त्रीणां चारुतुङ्गघनकुङ्कुमपिञ्जरेषु कुचान्तरेषु विलसन्ति।

एतदुक्तं भवति—ये शिवभक्ता गुरूपदेशमार्गेण गृहीतं शिवव्रतं शिलात्मकमनिर्वाणं न त्यजन्ति त एव शिवभक्ताः। तेषां मुक्तिरेव परमं फलम्। कविनोक्तं आनुषङ्गिकं फलमित्यवगन्तव्यम् ॥ ३१ ॥

इदानीं मल्हणकविः 'कान्ताकच' (श्लो. १) इत्यारभ्य 'एतद्विभागपरिकल्पन' (श्लो. ३१) इत्यन्तश्लोककदम्बकेन स्वस्य कामुकतया स्वाभिलाषानुरूपं शिवपूजायाः फलमुक्त्वा इदानीं विरक्तस्सन् मूढेत्यादिश्लोकचतुष्टयेन शिवपूजैकनियतं मुक्तिरूपं फलं याचते—

मूढो विवेक[1]विकलोऽसकृदूर्ध्वबाहुः
खिन्नः शृणुष्व[2] यदहं हर ते ब्रवीमि।
मा तन्त्रकर्मणि नियोजय देवदेव
संसारचक्रगहनं न पुनर्विशामि ॥ ३२ ॥

---

[1] मु पु. विकलः सकृ।  [2] क, ख-; तदहं।

**मूढ** इति । मूढः जडः मोहावृतः । अत एव विवेकविकलः कर्तव्याकर्तव्ययोः विकलः । इदं कर्तव्यं, इदमकर्तव्यमिति विवेकाभावात् पशुप्रायोऽहमित्यर्थः । असकृत् बहुवारम् । ऊर्ध्वबाहुः उद्यम्य बाहू । महोपद्रवसूचक इति खिन्नः निर्विण्णः । शृणुष्व शृणु । अवधारयेत्यर्थः । अत्रात्मनेपदं चिन्त्यम् । यत् यद्वचनम् । अहं हे हर ! ते तुभ्यम् । ब्रवीमि । मा, माशब्दः प्रतिषेधवचनः । 'अमानोनाः प्रतिषेधवचनाः' इति । तन्त्रकर्मणि कर्मतन्त्रसंसारे इत्यर्थः । 'राजदन्तादिषु परं' इति परनिपातः । नियोजय विनियोजय । देवदेव ! संसारचक्रगहनं संसारस्य चक्रं चक्रभ्रमणं तदेव गहनं अरण्यम् । न पुनर्विशामि । भूयो नाङ्गी—करोमीत्यर्थः ।

